## विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् । (१२/९१६)

वृक्ष मृग तृण धान्य व्यञ्जन [1]पशु शकुनि अश्ववडव [2]पूर्वापर [3]अधरोत्तर इत्येतेषां द्वन्द्वो विभाषा एकवद् भवति । प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । रुरुपृषतम्, रुरुपृषताः । कुशकाशम्, कुशकाशाः । व्रीहियवम्, व्रीहियवाः । दधिघृतम्, दधिघृते । गोमहिषम्, गोमहिषाः । तित्तिरिकपिञ्जलम्, तित्तिरिकपिञ्जलाः । अश्ववडवम्, [4]अश्ववडवौ । पूर्वापरम्, [5]पूर्वापरे । अधरोत्तरम्, [6]अधरोत्तरे ।

[१५५] बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम् । (म.भा. १.४७५)

एषां बहुप्रकृतिरेव द्वन्द्व एकवद् भवति, न द्विप्रकृतिः । बदरामलके । रथिकाश्वारोहौ । प्लक्षन्यग्रोधौ । रुरुपृषतौ । हंसचक्रवाकौ । यूकालिक्षे । व्रीहियवौ । कुशकाशौ ॥

## विप्रतिषिद्धं चानधिकरणवाचि । (१३/९१७)

परस्परविरुद्धं विप्रतिषिद्धम् । [7]विप्रतिषिद्धार्थानां शब्दानामनधिकरणवाचिनामद्रव्यवाचिनां द्वन्द्व एकवद् भवति । विभाषानुकर्षणार्थश्चकारः । शीतोष्णम्, शीतोष्णे । सुखदुःखम्, सुखदुःखे । [8]जीवितमरणम्, जीवितमरणे । विप्रतिषिद्धम् इति किम् ? कामक्रोधौ । अनधिकरणवाचि इति [9]किम् ? [10]शीतोष्णे उदके ॥

## न दधिपयआदीनि । (१४/९१८)

यथायथमेकवद्भावे[11] प्राप्ते [12]प्रतिषेध आरभ्यते । दधिपयआदीनि [13]शब्दरूपाणि नैकवद् भवन्ति ।

दधिपयसी । सर्पिर्मधुनी । मधुसर्पिषी । [14]ब्रह्मप्रजापती[15] । शिववैश्रवणौ । स्कन्दविशाखौ । [16]परिव्राट्कौशिकौ । [17]प्रवर्ग्योपसदौ । [18]शुक्लकृष्णौ । [19]इध्माबर्हिषी । निपातनाद् दीर्घः । दीक्षातपसी । श्रद्धातपसी । [20]मेधातपसी । अध्ययनतपसी । उलूखलमुसले । [21]आद्यावसाने । श्रद्धामेधे । [22]ऋक्सामे । [23]वाङ्मनसे ॥

## अधिकरणैतावत्त्वे च । (१५/९१९)

न इति वर्तते । अधिकरणं वर्तिपदार्थः । स हि [24]समासस्यार्थस्याधारः । तस्यैतावत्त्वे परिमाणे गम्यमाने द्वन्द्वो नैकवद् भवति । यथायथमेकवद्भावः प्राप्तः प्रतिषिध्यते । दश दन्तोष्ठाः । दश मार्दङ्गिकपाणविकाः ॥

---

1. पशु नास्ति फ. 2. पूर्वपर फ. 3. अधरोत्तराणां द्वन्द्वो इ. 4. अश्ववडवाः ड. 5. पूर्वापरौ ड. 6. अधरोत्तरौ ड. 7. विप्रतिषिद्धानाम् इ, प्रतिषिद्धार्थवाचिनां फ. ह. 8. उदाहरणमिदं नास्ति इ. फ. ह. 9. किमर्थम् ड. 10. सुखदुःखाविमौ ग्रामौ क. इ. फ. 11. च इत्यधिकम् ड. 12. प्रतिषेधोऽयम् क. ड. इ. 13. द्वन्द्वरूपाणि अ. 14. ब्राह्मणप्रजापती ड. 15. हरिवासवौ इत्यधिकम् क. 16. परिव्राजककौशिकौ ड. ह, नास्ति फ, परिव्राड्भिक्षुकौ ब. क. 17. प्रवर्ग्यापवर्ग्यौ ब. 18. शुक्लकृष्णे ब. इ. ह. 19. याज्यानुवाक्ये क. ड. 20. नास्ति क. 21. आद्यबसाने ब. क. ड. 22. वाक्सामे ब. 23. वाङ्मनसी ह. 24. समासार्थस्य क. इ. ह.